इत्थं प्रणम्य कनकेन रथं गजेन्द्रम्,
यः कल्पयेद् सकल पाप विमुक्त देहः।
विद्या धरामर मुनीन्द्र गणाभिजुष्टम्,
प्राप्नोत्यसौ पदमतीन्द्रिय मिन्दुमौलेः॥

कृतदुरित वितान प्रोज्ज्वलद्वह्निजालैः—
व्यतिकरकरदाहो द्वेगमग्नोऽपि बन्धून्।
नयति च पितृ-पौत्रान् रौरवादप्यशेषान्,
कृतगजरथदानं शाश्वतं सद्म-विष्णोः॥

इति हेमहस्तिरथ दानम्।

—*—

## (३७) श्रीमद्भागवतदान विधानम्१[S]।

—*—

इदं भागवतं नाम पुराणं श्रेष्ठमीरितम्।
भक्तानां ब्राह्मणानाञ्च वैष्णवानां विशेषतः॥

दानाच्छ्रवणतश्चास्य विष्णुलोके महीयते।
श्रद्धया परया भक्त्या दानंकुर्य्याद्विमुक्तये॥

एवं कृत्वा महाभाग ! विष्णु सायुज्यमाप्नुयात्।
अष्टादश सहस्राणि तत् पुराणं प्रकीर्त्तितम् २(+)।

आचार्याय सुधीर्दत्वा मुक्तः स्याद्भवबन्धनैः।
गायत्र्या हवनं कार्य्यं पायसेनाज्यतस्तथा॥

---

१ (S) "यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः।
वृत्रासुर वधोपेतं तद्भागवतमिष्यते॥"
अत्र श्रीभागवतटीका-भूमिकायां [illegible] पुनरुक्तमस्ति।
'इतिहासपुराणं पञ्चमोवेदानांवेदः' इतिश्रुतिः।

२ (+) पौराण सम्बन्धी [illegible] श्लोकैः "[illegible] पुरुषः" इत्यादि श्रीभागवतस्य [illegible]।
यथाच— "[illegible] नवकं चैव पौरवं [illegible]।
नित्यं जपं [illegible] [illegible] विमुच्यते"॥

इति भट्ट भास्करीयभागवती भाष्य धृत प्रमाणम्।

तिलैः श्रीहिर्मिरेवाज्य महाव्याहृतिभिर्यजेत् ।
होमान्ते भगवद्विष्णुः पूज्यः स्वर्णमयः शुभः ॥
उपचारैः षोडशभिर्मन्त्रैः पौरुष सम्भवैः । १(*) ।
ततश्च धेनुर्दातव्या कथावक्त्रे प्रयत्नतः ॥
एवं कृते विधानेचेत् सर्वपाप निवारणे ।
फलदं स्यात् पुराणन्तु श्रीमद्भागवतं शुभम् ॥ इति ।

इति संक्षेपेण श्रीमद्भागवतदानम् २(†) ।

—•—

## (३८) अथ रामायणश्रवणविधानम् ३(‡) ।

रमायणे श्रुते दद्याद्रथं हेममयं सुधीः ।
चतुर्भिर्वाजिभिर्युक्तं तथा क्षौम पताकया ॥
यन्त्राचैव समायुक्तं किङ्किणीनाद नादितम् ।
एवम्भूतं रथं दत्वा धेनुं दद्यात् पयस्विनीम् ॥
ब्राह्मणान् भोजयेत् पश्चाच्छत मष्टोत्तरं सुधीः ।
एवं कृते विधाने च महाकाव्यं फलप्रदम् ॥
रामायणं भवेन्नूनं नात्र कार्य्या विचारणा ॥

—*—

## (३९) अथ वाशिष्ठ श्रवणम् ४(×) ।

वाशिष्ठ श्रवणे जाते कृतिना विधिपूर्वकम् ।
प्रदेयं शशिनोबिम्बं राजतं पलमानतः ॥
हवनं पायसेनैव साज्येनायुत सम्मितम् ।

---

१ (*) अत्र श्रीमद्भागवतदानमात्रं उच्यते ततः पद्मविस्तरैव वक्ष्यते ।
२ (†) एतच्चतुर्विधं-वाल्मीकि-रामायणम्, वाशिष्ठ रामायणम्, अध्यात्मरामायणम्, अद्भुत-रामायण मिति ।
३ (‡) "यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायण कथा लोकेषु प्रचरिष्यति ॥"
अन्यत्र— 'इतिहास पुराणानि रामस्य चरितानि' इत्यादि धर्मशास्त्रे ।
इत्य मेतस्य माहात्म्यं चतुर्विंशतिसहस्रैः श्लोकसमाख्यातोऽस्ति ।
४ (×) अथ वाशिष्ठ रामायणेऽपिचतुर्विधमेवाख्यानकम् । वैराग्य-मुमुक्षु-उत्पत्ति-स्थिति-उपशम-निर्वाणानीति षट् प्रकरणानि सन्ति । सटीक-मस्य संख्या षट्सहस्रोत्तर षट् त्रिंशत्सहस्रम् ।
पश्चात् श्रीमच्छङ्कराचार्यकृतोऽन्य श्रीवाशिष्ठ महारामायण मिति नामान्तरम् ।

पलार्द्धेन तदर्द्धेन तदर्द्धेनाथवा पुनः ।
धनदस्य प्रति कृतिं कुर्य्यात् स्वर्णमयीं शुभाम् ॥
द्विभुजां वाहनो पेतां नयनानन्द कारिणीम् ।

359. **श्री प्रश्नेतु—**

ह्रस्व मापिङ्गलकचं गदिनं पीत विग्रहम् ।
पुष्पकस्थं धनाध्यक्षं ध्यायेच्छिवसखं सदेत्युक्तम् ।
स्वर्णवर्ण कृतं पाणि मश्ववाहं निरीश्वरम् ।
चित्रिण्याः प्रियकृद्देवं कुवेरं तमहम्भजे ॥
इति लक्षण-लक्षितां कुर्य्यात् १(*) ।
पद्म शङ्खनिधिभ्याञ्च युक्तान्तां पार्श्वयोर्द्वयोः ।
श्वेतवस्त्रेण संवेष्ट्य तण्डुलोपरि विन्यसेत् ॥
तण्डुलानां परिमाणं भवेद्द्रोण-चतुष्टयम् ।
तदर्द्धंच तदर्द्धंवा वित्तशाठ्यं नकारयेत् ॥
श्वेत माल्यैस्तथा गन्धैरनुलिप्य प्रपूजयेत् ॥
आग्नेय्यां दिशि होमश्च समिदाज्य तिलैर्भवेत् ॥
मन्त्रो राजाधिराजायेत्येष योज्यः सलिङ्गकैः २(†) ।
व्याहृत्य तिलहोमश्च कर्त्तव्यो धनकाङ्क्षिभिः ॥
आचार्य्यः सर्व्वशास्त्रज्ञोविनीतः सर्व्व-सम्मतः ।
महाकुल-प्रसूतश्च धर्म्मज्ञः सत्यवाक् शुचिः ॥
कारयेदर्च्चनं तेन धनदस्याति (पि) भक्तितः ।
तद्दैवत्येन मन्त्रेण सच कामेश्वरो भवेत् ३(‡) ॥
तस्मै होमं कृतवते प्रदद्यात् प्रतिमान्तु ताम् ।
मन्त्रेणानेन विधिवत् प्राङ्मुखाय उदङ्मुखः ॥

---

१ (*) इति वर्णित-लक्षणेन लक्षितां कुवेर मूर्त्तिं कुर्य्यादित्यर्थः । श्रीप्रश्नो मन्त्रशास्त्रीयः ग्रन्थः ।

२ (†) मन्त्रो यथा—'कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनु पूर्व्वं वियूय इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमउक्तिं यजन्ति' । शुक्ल, यजुः १०।३२ । कुवेर इत्यत्र वायु-मार्कण्डेय पुराण-श्रीमद्भागवतेष्वस्ति । यक्ष देव विशेषः । स च धनेश्वरः । उत्तरदिक्पतिश्च ।

३ (‡) 'कामीश्वरोभवे'दिति क्वचिदादर्शे ग्रन्थे पाठः ।

## (१६६) अथ गृष्टि कृष्णाजिन दानम् १(*)।

—*—

388. **विष्णुधर्म्मोत्तरे—**

वैशाख्यां पौर्णमास्याञ्च कार्त्तिक्यां विषुवे तथा ।
अयने ग्रहणे वापि दद्यात् कृष्ण मृगाजिनम् ॥
भूमौ गोमयलिप्तायां दर्भानास्तीर्य्य मानवः ।
तत्राविकन्तथावस्त्रं प्रागग्रञ्च प्रसारयेत् ॥
आविकं वस्त्र—कम्बलम् ।
तस्मिन् कृष्णाजिनं भूप निर्मा(सं) सम्प्रसारयेत् ।
प्राग्ग्रीव मुत्तरमुखं सश्रृङ्गं स खुरन्तथा ॥
प्राग्ग्रीवं—प्राक्सिरस्कम् ।
उत्तरदिशि कृतं मुखं सलोमकं प्रसारयेदित्यर्थः ।
स्वर्णश्रृङ्गं रौप्यक्षुरं मुक्ता लाङ्गुलभूषितम् ॥
अत्र सुवर्ण श्रृङ्गत्वादिकं यथा शक्ति कार्य्यम् ।
तिलैः संछाद्य कृष्णैस्तु यथा शक्त्या यथा विधि ।
सौवर्णं क्षीरपात्रन्तु पूर्व्वस्यान्दिशि धापयेत २(†) ॥
राजतं दधिपात्रन्तु दक्षिणस्यान्निधापयेत् ।
घृतपूर्णं ताम्रपात्रं पश्चिमायां निधापयेत् ॥

---

१ (*) प्रदानस्य प्रभावाच्च सौवर्णालङ्कृता मुने ।
त्रिंशत् कोट्यास्तु वर्षाणि मभीत्यभ्यधिका पुरा ॥
सिंहासनोपविष्टस्तु श्वेतवस्त्र-परिच्छदः ।
वसति तत्र वैकालं यावदाभू(तु)त संप्लवम् ॥
यदि मानुष्यमायाति कदाचित्काल-पर्य्यये ।
चतुर्व्वेद गृहे जन्म जायते महताकुले ॥
रूपवान् बलवांश्चैव दीर्घायुः प्रियदर्शनः ।
वल्लभः सर्व्वनारीणां दाता भोक्ता तथैव च ॥ इति चतुर्वर्ग चिन्तामणौ ।
हेमाद्रौ, दानेऽस्य 'अथातः कृष्णाजिन-दानविधिं वक्ष्यामः ।
इत्यारभ्य—विधानवत् प्रणम्योक्त्वा ततः दानरीतिञ्च विलिख्य ततः पूर्व्वदिशि प्रति-गृह्णीया'दित्यन्तं सर्व्वमुक्तम् ।
'कृष्णाजिन विधिं ब्रूहि मम माधव पृच्छतः ।
यस्मात्वयैतु दानानि सर्व्वपाप हराणि च' इति तत्रैव विष्णुधर्म्मोत्तरे ।

२ (†) 'पूर्व्वस्याञ्च निधापयेत्' इति पाठान्तरम् ।

## विष्णु धर्म्मोत्तरे—

पलन्तु कुड़वः प्रस्थ आढ़कोद्रोणएव च !
धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः ।।
द्रोणैः षोड़शिः खाढ़ी(री)विंशत्या कुम्भ उच्यते ।
कुम्भैस्तु दशभिर्वाधो(क्षो) धान्यसंख्याः प्रकीर्त्तिताः ।।

'विंशत्या' इत्यत्र द्रोणैरित्यनु सञ्यते । तेन कुम्भोद्रोणद्वयमिति पूर्व्वोक्तपक्षाद् विंशति द्रोणमितः कुम्भ इत्यपरः ।

षट्सहस्र परिमितः कुम्भ इति केचित् ।

एतेषाञ्च पक्षाणां देशकालात्माद्यपेक्षया व्यवस्था ज्ञेया १(*) ।

## स्कन्दपुराणेच—

पलद्वयेन प्रसृतं द्विगुणं कुड़वं मतम् ।
चतुर्भिः कुड़वैः प्रस्थ आढ़कस्तैश्चतुर्गुणैः ।
चतुराढ़को भवेद् द्रोण इत्येतद् द्रव्यमाणकम् ।।
चतुर्गुणैर्भवेद् द्रोण इत्यन्यत्र पाठः ।
द्रव द्रव्यमान मित्यर्थः ।

## ग्रन्थान्तरे च—

लाज-पायस-नालिकेर सलिले सूत्रेजले……… ।
द्वात्रिंशत्पलिकः पलैधृतिमितैः प्रस्थैश्च षट् सम्मतः ।
तैल क्षौद्रघृतेषु विंशति पलैर्दध्नस्तु पञ्चोत्तरैः ।
प्रस्थः क्षीरगतो बुधै र्निगदितस्त्रि शत्पलैरेवतु ।।
अत्र धृतिरष्टादश संख्येति ।

---

१ (*) तथाहि स्मृतौ,—
'देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् ।
उपपत्तिमवस्थाञ्च ज्ञात्वा धर्म्मं' 'समाचरेत्' इति ॥
देशभेदेतु च—
'पलैर्षोडशभिः प्रस्थो मागधेषु प्रकीर्त्तितः' । मागधं पाटलोपुत्रादौ ।
'काकिनीतु चतुर्भागो माषस्य च पणस्य च ।
पञ्चनद्याः प्रदेशेतु संज्ञेयं व्यावहारिकी' ॥
कार्षापणोदक्षिणस्यान्दिशि रौप्यप्रवर्त्तते' । दक्षिणापथ इत्यर्थः
'पणैर्निबद्धः पूर्व्वस्यां षोडशैव पणास्तु' । पूर्व्वस्यां बङ्गादौ । पञ्चनद्याः पञ्चनद प्रदेशे इति ।

दक्षिणावस्थित पाद( हर्व )रेखासम्बद्धाग्रेण, तेनैव सूत्रेण मध्यरेखापश्चिमान्तं स्पृष्ट्वा-उत्तरावस्थित ज्यारेखां यावद् भ्रमता धनुराकार मध्यं चन्द्रकुण्डं कुर्य्यादित्यर्थः।

इदमपि दक्षिणस्यां दिशि वीथ्योपमानं कुण्डमुत्तराग्रं कर्त्तव्यम्। उदगग्रत्वञ्चो-दीच्यां नवधा विभागेन सम्पादनीयम्।

## तदुक्तं सिद्धान्त शेखरे,—

यास्ये तन्मारणे शस्तमुत्तराभि मुखं तदा।
नवधा भाजिते क्षेत्रे चतुरस्रे समे तदा॥
दक्षिणे चोत्तरेचांश मेकैकञ्च परित्यजेत्।
सप्तां शं समसूत्रेण भ्रमणादर्द्ध चन्द्रकममिति १(*)॥

## शारदा तिलकेतु,—

दशधा विभक्तस्य मध्यम सूत्रस्य भागद्वयं परित्यज्यावशिष्ट भागात्मक ( ष्टक ) मिति सूत्रभ्रमणेनार्द्धचन्द्रं कुर्य्यादित्युक्तम्।

चतुरस्रीकृतं क्षेत्रं दशधा विभजेत् पुनः।
एकमेकन्त्यजेदं शमधऊर्द्ध(चन्द्र)ञ्च मन्त्रवित्॥
ज्यासूत्रं पातयेदग्रे तन्मानाद् भ्रमयेत्ततः।
अर्द्धचन्द्र निभं कुण्डं रमणीयमिदं भवेदिति॥
इत्यर्द्ध चन्द्रकुण्डम्।

## त्रिकोणकुण्डनिर्म्माण मुक्तं, कामिकागमे,—

त्रिभागवृद्धितो मनस्यैस्त्रिभिर्वैशा(मा)न्तरं भवेदिति। इष्टप्रमाण चतुरस्रक्षेत्रस्य प्राचीरेखां त्रिधा विभज्य तृतीयां शेन तां रेखां पुरस्ताद्वर्द्धयेत्।

---

१ (*) कामिकेतु,—चतुरस्रीकृतं क्षेत्रं चतुर्विंशतिधा भजेत्। एकोनविंशत्या विंशद्दशांशा-दाक्षयात्मवे: ॥ प्राच्यन्तान्विभजेत्संफलं मध्यगधनुःस्थितिः ॥ तद्वध्येधग्रंथम् प्राच्यातिर्यक् सूत्रं ततोभवेत्। कुण्डमर्द्धेन्दुसदृशं मध्यम्, हि मनोहरम्। इत्यर्द्ध चन्द्रकुण्डविधयं। 'त्रिभिर्भेशांतरं भवेदिति' पाठान्तरम्।

क्षेत्रस्य तिरश्चीन पश्चिमरेखाष्ट तृतीय भागेन दक्षिणोत्तरयोर्वर्द्धयित्वा मध्येय-रेखा प्रागग्रता ( प्रागप्रतीच्यायता ) पश्चिमरेखा प्रान्तद्वयं यावत् सूत्रद्वयं निपातनात् कोणद्वय-मत्स्यद्वय युक्तं त्रिकोण-कुण्डं भवेदित्यर्थः १(†) ।

## शारदा तिलकेतु,—

मध्यरेखां चतुर्द्धा विभज्यैकैकमेवं पूर्व्वोक्तेषु त्रिषु स्थानेषु वर्द्धयित्वा त्रिकोणकुण्डं कुर्य्यादितुक्तम् ।

चतुर्द्धा मेदिते क्षेत्रेन्यसेदुभयपार्श्वयोः ।
एकैक मंशं तन्माना दग्रतोलाञ्छयेत्ततः ॥
सूत्रद्वयं ततः कुर्य्यात् त्र्यस्रं कुण्डमुदाहृतमिति ॥
इदन्तु कुण्डं प्रागग्रं कर्त्तव्यम् २(‡) ।

नैर्ऋत्ये दिशि तत्कुर्य्याद्विषेपूर्व्वदिगग्रकम् । इति सिद्धान्तशेखरोक्तेः ।

## वृत्तकुण्डनिर्म्माण प्रकारः कामिके,— ३(*)

कर्णार्द्धाष्टांशसंन्यासाद् वृत्तं कुण्डमिहोदितम् । इति समचतुरस्रस्य क्षेत्रस्य कोण-

---

१ (†) महाकपिलपञ्चरात्रे,—दार्घ्यमर्द्धतुल्यं सूत्रं त्रिधा तत्पातयेद्भुवम् ।
पूर्व्वार्धकुण्डकं कृत्वा त्रिकोणन्तु प्रकारयेत् ॥ ग्रन्थान्तरेतु—
सर्व्वरी ( १६।८ ) सार्द्धभागीकृतकोणतःपार्श्वयोर्न्यस्य भागत्रयं पश्चिमतः ।
तेन मानेन सूत्रद्वयं विन्यसेत्, कुण्डमितद्भवेदुद्धनेवाद्यकम्' ॥
" अन्यच्च,—'क्षेपयार्धं पुरतुर्य्य मध्योभय पार्श्वयोः ।
वर्द्धयित्वा कृतैः सूत्रैः कुण्डं त्र्यस्रं विभिर्भवेत्' ॥
तन्त्रान्तरे,—'चतुरस्रीकृते क्षेत्रे क्षेपमष्टांशकं बहिः ।
विन्यसेदन्तसूत्राग्रे प्रतीच्यां सूत्रपार्श्वयोः ॥
सूत्राणां त्रितयं न्यसेत् त्रिकोणं कुण्डमीरितम्' ।
" अयन्तु पुण्यकम्,—मूलसूत्रस्य महीधरभाष्ये पञ्चरात्र-शारदातिलक-कामिमत-कामिक-क्रियासार-सिद्धान्तशेखर-चाचारहस्य-महाकपिलपञ्चरात्र-हयशीर्षपञ्चरात्र-कुण्डार्कादिषु चर्त्ति ।
एषां विरोधो मीमांसाच राघवभट्टीय व्याख्या नैविद्यते ।
२ (‡) 'नैर्ऋत्ये(दिशि) दर्शितंकुण्डं विदेषे पूर्व्ववत्क्रमम्' ।
इति सिद्धान्तशेखरे ।
३ (*) 'वृत्तकुण्डे मध्यसूत्रं चतुर्विंशतिधा भवेत् । एकांशपञ्चविंशांशसहितं सार्द्धमंशकम् ।
बहिर्न्यस्य भ्रमान्मध्यात् वृत्तं कुण्डमितीरितम्' ॥ अन्यत्रिन्यस्य च,—'चतुरस्रं पुरा कृत्वा कुण्डक्षेपप्रमाणतः । नवभागं पुरा कृत्वा चैकभागं बहिर्न्यसेत् । तन्मध्यं गृहीत्वैव, भ्रमणाद्वर्त्तुलं भवेत्' ॥ सिद्धान्तशेखरेऽपि,—'चतुरस्रे सुसंसिद्धे तदर्द्धे भागमष्टमं । क्षेत्रस्य विन्यसेद्दिक्षु मध्याद्भ्रमणसूत्रतः । भ्रमणभ्रामणेनैव वृत्तं कुण्डमुदीरितम्' ॥

सूत्रं कर्णाः । तस्य यदर्द्धं तस्याष्टधा विभक्तस्याष्टमांशेन चतुरस्रक्षेत्रस्य प्राचीमध्य रेखां पुरस्ताद् वर्द्धयेत् ।

ततः क्षेत्रमध्ये सूत्रादि ( नि ) निधाय वर्द्धितरेखाग्रं यावत् सूत्रं प्रसार्य्य तन्मानेन सूत्रेण सर्व्वतः भ्रमणाद्वृत्तं कुर्य्यादित्यर्थः । **शारदातिलके,**—( वृत्तकुण्डमाह )—

मध्यमां प्राचीरेखां साष्टांदशांशेन ( दशांशेन ) पुरस्ताद्वर्द्धयित्वा क्षेत्रमध्ये सूत्रं निधाय, वर्द्धित रेखाग्रं यावत् प्रसार्य्य तेन सूत्रेण सर्व्वतो भ्रमणाद् वृत्तं कुर्य्यादित्युक्तं वर्त्तुलंकुण्डम् ।

अष्टादशांशे क्षेत्रेच न्यसेदेकं वहिर्बुधः ।
भ्रामयेत्तेन मानेन वृत्तं कुण्ड मनुत्तममिति (१।†) ॥

इति वृत्तकुण्डम् ॥

## अथ षड़स्रकुण्ड निर्म्माण प्रकार माह । कामिकागमे—२(*)

षड्भागवृद्धितोमत्स्यैश्चभिःस्यात् षड्स्रकम् । इति समचतुरस्रोपमक्षेत्रे षोढ़ा विभज्य तस्य मध्यमा दक्षिणोत्तरायतोरेखा मेकैकेनांशे नो भयतोवर्द्धयेत् । ततः क्षेत्रमध्याद्वर्द्धितरेखोद प्राग्, वर्द्धित दक्षिणोत्तरायतरेखार्द्धपरिमितमेकैकसूत्रं निपात्य पश्चिमवायव्यान्तराले मत्स्य मुत्पाद्य ( मुत्सार्य्य ) तेनैव प्रकारेणैशान-पूर्व्व-दिगन्तरालेऽपि मत्स्य मुत्पादयेत्पुनः ।

[ क्षेत्रमध्याद्वर्द्धितरेखा दक्षिणाग्राग्, पूर्व्वोक्तपरिमाण मेकैकं सूत्रं निपात्य, पश्चिम-नैर्ऋत्यान्तराले मत्स्यमुपाद्य, तेनैव प्रकारेणाग्ने पूर्व्वदिगन्तरालेऽपि पूर्व्वमत्स्य-मुत्पादयेत् ]

ततश्चतुरस्र सम्बन्धि-पूर्व्वपश्चिमरेखयोस्तन्मध्यचतुष्टयानुसारेण लाञ्छनचतुष्टयं कुर्य्यात् । ततोवर्द्धितरेखा ग्रहणेन लाञ्छन चतुष्टयं यावत् सूत्रचतुष्टयं निपातयेत ।

एवञ्च लाञ्छन चतुष्टयोऽन्तरालवर्त्ति प्राक्पश्चिमरेखाभ्यां महरेखाषट्क मेलनात् षट्कोणकुण्डं कुर्य्यादित्यर्थः ॥

---

१ (†) 'चतैकस्यतृतीयांश मङ्गितानि एकोनविंशदङ्गुलानि व्यासः ।
तेन मङ्गलमन्तरम् । वैचनैकंभागं वहिर्न्यसेदर्द्धं नयेतिशेषः ।
तदानुक्षपक्षेन सदैकवाक्यता भवति इति वदन्ति' । इति राघवभट्टीये ।

## पद्मकुण्ड प्रकारोऽपि, कामिके,—१(*)

चतुरस्राष्टभागेन कर्णिकास्याद् द्विभागतः ।
तद्बहिस्त्वेकभागेन केशराणि प्रकल्पयेत् ॥
तृतीये दलमध्यानि चतुर्थे दल कोटयः ।
चतुरस्रां वहिः कुर्य्याद् दलाग्राण्यपि यत्नतः ॥
अत्र-दल कोटयोदलोत्तरभागशः ।
भ्रमणात् पद्मकुण्डं स्याद्दलाग्रे दर्शयेद्बहि रिति ॥

विभागश, इति विभाग-दिग् भागे सर्व्वदिग्भागेष्वित्यर्थः । भ्रमणात्सूत्रस्येति-शेषः । एतच्च पादद्वयं प्रत्यवान्तरवाम ( वाक्य )द्वयंद्वयं सम्बध्यते । दलाग्रं दर्शयेद्बहि-रित्यनेनापि चतुरस्राष्टभागेनेति सम्बध्यते । वहिरिति—क्षेत्राद्बहिः पञ्चमे वृत्तइति यावत् । ततश्चायन्तात्पर्य्यार्थः ।

१—(अ)ष्टप्रमाणचतुरस्रे क्षेत्रस्य मध्यमां प्राचीरेखामष्टमां विभज्याष्टमांशपरिमितेन सूत्रेण क्षेत्रमध्यं (नोत्वा) वृत्तं रचयेत । पुनःक्षेत्रमध्यविन्यस्तैककोटिनाष्टमांशद्वयपरिमि-तेन सूत्रेण, तद्बहिर्द्वितीयवृत्तं रचयेत् । तत्तलमध्यानि परिकल्पयेत् २(*) ।

---

१ (1) 'षडस्रे मध्यसूत्रन्तु चतुर्विंशतिधा भजेत् । तत्रैकैकनवांशेन तद्बाह्यैः सम्बद्धमध्यतः ॥
भ्रामयेत्तेन षट्सूत्रं ( षड्वृत्तं ) तद्व्यासार्द्धेन लाञ्छयेत् ॥
षट् सुस्थानेषु षट्सूत्र पातनात्तत् षड' श्रकम्' ॥
" 'षट्धा विभजेत् सूत्रं मध्यसूत्रा दधोपरि । भागं न्यसेदेकमेकं पार्श्वयोर्दिगन्ततः ।
सम्बद्धा चैतेष्वष्टांशं ततऊर्द्धाधरो तिमौ ।
चैवाष्टमांशतः कुर्य्या द्विक्सूत्रे तावदन्ततः ॥
सम्भेद्य चैतषष्ठांशं गुणेनैव सुदक् तिमौ ।
षट्सूत्रौ पातयेत्तेषु षडस्रकुण्डमुत्तमम्' । इति कुण्डपर्य्ये ।

१ (*) पद्मकुण्डमाह, क्रियासारे—कृत्वैवं पूर्व्ववद्वृत्तं तन्मध्ये वर्त्तुलत्रयम् ।
भ्राम्यैवं पङ्कजाकारं कारयेत् कर्णिकादिभिः ॥ इत्यन्यच्च,—
पद्मक्षेत्रस्य सन्त्यज्य द्वादशांशं बहिःसूत्री: । तन्मध्यं विभजेद्वृत्तैस्त्रिभिः समविभागतः ॥
इत्यपरञ्च, पद्मकुण्डे मध्यसूत्रं चतुर्विंशतिधा भजेत् ।
भ्रमयेत् कर्णिकावृत्तं त्र्यंशहस्तार्द्धमानतः ॥ 'यावान्कुण्डस्य विस्तार:खननन्तावदेवहि' ।
षडंशहस्तार्द्धमान—भ्रमितैस्तु; केशराः । नवांशहस्तार्द्धमाने वृत्तेस्यात्पद्ममध्यमूः ।
द्वादशांशात्तु हस्तार्द्धात्त पत्रेऽवदधं भूः श्रुता ॥
दलाग्राणान्तु हस्तार्द्धं कृत्वा पञ्चदशांशकैः । न्यूनैःपञ्चभिरेकांशचतुर्थांशकैः क्रमात् ।
रेखाभेश:पञ्चसूत्रस्तोभो दलाग्राणि प्रकल्पयेत्' ॥ इति ।

पुनस्तस्मिन्नेव सूत्रे चतुरष्ट (र्थाष्ट) मांसं सम्बर्द्ध्य, तद्बहिश्चतुर्दिक्षु चतुरस्र-प्रान्तरेखा-स्पष्टं क्षेत्र समन्यासं, क्षेत्रमध्याच्चतुर्थ वृत्तं रचयेत् । तत्र दलानामुत्तरभागान् कल्पयेत् ।

ततःपुनस्तस्मिन्नेव सूत्रे पञ्चम मष्टमांशे सम्बर्द्ध( र्द्ध्य ) क्षेत्रमध्यचिह्नात् पञ्चमं ( मे ) वृत्तक्षेत्राद्बहिः कुर्य्यात् ।

तत्रच(त्य)तुलाप्रमाणान्तरालाणि दलाग्राणि रचयेत । दलाग्रान्तरालानि परित्यज्य दला ग्रैःसह सर्व्वं खनेत । तथाच त्यक्तचतुरस्रकोणभूमिदलाग्रैः परिगृहीता भवति ।

खातकुण्डाधो ( मध्यप्रदेशे ) विस्तारसमोत्सेधां कर्णिकां रचयेत् ।

## तथाच, कामिके—

तत्सन्धिश्च तथा कुर्य्यात कर्णिकाव्यासमानः । इति ।
कर्णिकातोवहिर्यथा सम्भवं केशरादीनि प्रकल्पये दिति ॥

इदञ्च पद्मकुण्डमष्टदलं चतुर्द्दलंवा कर्त्तव्यम् । ( वेददलमष्टदलन्तुवेति कामिकोत्तरेच ) अवशिष्टदलं वेददलमष्टदलन्तुवा इति । सिद्धान्तशेखरेऽपि—

चतुर्दिक्षु चतुः पत्रं पद्माभं कुण्डमितीरितम् ।
विन्यस्य तत् प्रमाणेन तुर्य्याष्टमन्तु रचयेत् ॥
मत्स्यकर्णप्रमाणेन तत्कुजास्वपि लाञ्छयेत् ।
तत्राष्टसूत्रसंयोगाद् अष्टास्रं कुण्डमुच्यते १(*) ॥ इति ।
क्षेत्रस्य चतुरस्रीकृतस्य द्वादशं भागं तदन्तरे विदध्यात् ।

---

१ (†) अष्टास्रकुण्डलक्षणं पश्चाद्वक्ष्यते । पद्माकृतौ,—यद्योगं तन्मात्रं वर्णितम्
अष्टास्रकुण्डमाह,—
"कुण्डेऽष्टास्रे मध्यसूत्रं चतुर्विंशतिधा भजेत् ।
एकांशार्द्धाष्टमांशाभ्यामंशमेकं बहिर्न्यसेत् ॥
चतुर्दिक्षु तन्मानाच्चतुरस्रान्तरं भवेत् ।
षट्चत्वारिंशदेकांश चतुःषष्ट्यंश संयुतैः ॥
सप्तांशैर्लाञ्छयेदास्यं चतुरस्रास्त्रिपार्श्वतः ।
दिक्सूत्रसम्पातादष्टास्रं समबाहुकम् ॥" तन्त्रान्तरेण,—
"कुण्डेऽष्टास्रमध्यसूत्रं चतुर्विंशतिधा भजेत् ।
एकविंशमांशाख्यं भ्रामयेद्यात् वर्त्तुलम् ।
तन्मध्ये दिक्ष्वष्ट सूत्रदानादष्टास्रकं मतम् ।' श्रीमद्भास्करमतेन,—
'वेदाश्रितद्वादश दिग्गुणयुतम्, दिक्कोण मध्ये कृता-
ष्टाक्षेपतनमध्येतन्नतीयमिन्मितैरष्टास्रिकुण्डं भवेत् ॥' इति ।

तस्य चतुरस्रस्यान्तरे वहिश्चतुर्दिक्षुविन्यस्य लाञ्छयित्वा तत्प्रमाणेन वहिर्लाञ्छितस्य द्वादश ( मत्स्यभागस्य ) भागस्य परिमाणेनापरं द्वितीयं तुर्य्यास्रं नयेत् प्रणयेदिति । तथाहि पूर्व्वं चतुरस्रस्य वहिः परितोद्वितीयं चतुरस्रं कुर्य्यादित्यर्थः । अत्रतुर्य्यशब्दःपूरणप्रत्ययान्तोऽपि चतुःसंख्यापरः । तस्येति,—तस्य वाह्य चतुरस्रस्य । कर्णप्रमाणेन,—कोणसूत्रार्द्धप्रमाणेन । तद्भूजासु, तस्य वाह्य चतुरस्रस्य भुजासु । दिक्चतुष्टयावस्थित रेखासु लाञ्छयेदङ्कयेत् ।

कर्णशब्दो यद्यपि शिल्पशास्त्रे कोणसूत्रवचनः प्रसिद्धः तथापि तत्र कोणसूत्रस्य भूजाशब्दवाच्य दिग्रेखापेक्षया अधिकपरिमाणत्वात् तेन तुलासु लाञ्छयितुमशक्यत्वात कोणसूत्रार्द्ध परः ।

तत्राष्टसु लाञ्छनेषु अष्टसूत्रसंयोगात् सूत्राष्टकपातेन पद्मकुण्डं समपद्यते । अत्रायंतात्पर्य्यार्थः, इष्टप्रमाणचतुरस्रस्य मध्यरेखां द्वादशधा विभज्यैकैकं भागं वहिश्चतुर्दिक्षु, विन्यस्य तत्परिमाणेनापरं चतुरस्रं पूर्व्वचतुरस्रस्य परितः, कुर्य्यात ।

तथा, वाह्य चतुरस्रकर्णार्द्धप्रमाणसूत्रस्यादि वाह्यचतुरस्रस्येशानकोणे निधाय तस्यैव पूर्व्वपरिधि रेखायां त सूत्रं (तत्सूत्रं) प्रसार्य्य तन्मानेनाग्नेयपूर्व्वयोरन्तरालं चिह्नयेत् ।

पुनस्तस्मादेव कोणादुत्तररेखायामुत्तरवायव्ययोरन्तराले तन्मानेन चिह्नयेत । ततः सूत्रस्यादि–आग्नेयकोणे निधाय वाह्यचतुरस्र-पूर्व्वरेखायां पूर्व्वेशानयोरन्तराले तन्मानेन चिह्नयेत् ।

ततःसूत्रस्यादि निर्ऋति कोणे निधाय दक्षिण रेखायामाग्नेय-दक्षिणयोरन्तराले तन्मानेन चिह्नयेत् ।

पुनस्तस्मादेव कोणात्पश्चिमरेखायां वायव्य(चापस्य) पश्चिमरेखयोरन्तरालेतन्मानेन चिह्नयेत् ।

ततःसूत्रस्यादि वायव्य कोणे निधाय पश्चिमरेखायां तन्मानेन पश्चिम नैर्ऋत्ययोरन्तराले चिह्नयेन ।

पुनस्तस्मादेव कोणा दुत्तररेखान्तन्मानेनोत्तरेशानयोरन्तराले चिह्नयेत् । एवं प्रतिदिशं लाञ्छनद्वयं करणाद्दिक्चतुष्टये लाञ्छनाष्टकं भवति । ततः कोणोभय पार्श्ववर्त्ति लाञ्छनद्वयं स्पृष्टाग्रं सूत्रचतुष्टयं निपातयेत् ।

एवञ्च प्राच्यादिचिह्नद्वयान्तरालवर्त्ति-सूत्रचतुष्टयेनसह, सूत्राष्टम(ष्ट)कयोगादष्टास्रकुण्डंभवतीति । कुण्डखनने प्रकार उक्तः ।

## का(कु)लोत्तरे,—१(*)

चतुर्विंशतिमं भागं अङ्गुलं परिकल्प्यतु ।
चतुर्विंशाङ्गुलं हस्तं कुण्डानां परिकल्पयेत् ॥
हस्तमात्रं खनेत्तिर्य्यं गूढं मेखलया सहेति ।

पूर्व्वोक्तमुक्तया परिमाणानां मध्ये होमानुसाराद् यस्य यावत् परिमाणं कुण्डं चिकीर्षितं तस्य कुण्डस्य क्षेत्रं चतुर्विंशतिधा विभज्य चतुर्विंशतिभागपरिमाणं आयामं परिकल्प्य तादृशैश्चतुर्विंशत्याङ्गुलैर्हस्तं परिकल्प्य, तेन हस्तेन परिमितं कुण्डानां तिर्य्यक् खननं विधेयम् ।

अधःखननंतु कुण्डाधः प्रदेशाकण्ठं तत्सन्निहित-मेखलाग्रं यावत् परिकल्पितं-हस्तपरिमित मूर्द्धमानं यथा भवति, तथा विधेय मित्यर्थः २(०) ।

---

१ (*) 'चतुर्विंशति मोभाग: कुण्डानामङ्गुलं स्मृतम्' इति सिद्धान्तशेखरे ।
कालोत्तरे,—
कालोत्तरमनन्यास्त्रयन्य: सुप्रसिद्ध: ।
'खाताद् बाह्योऽङ्गुल: कण्ठ: सर्व्वकुण्डेष्वयं विधि: ।
चतुर्विंशतिमं भागमङ्गुलं परिकल्पयेत् ॥'
कपिलपञ्चरात्रे,—'चतुर्विंशतिभागेन कण्ठोवै परिकीर्त्तित:' इति ।
सोमशम्भुरात्र,—
'कुण्डानां यश्चतुर्विंशोभाग: सोऽङ्गुल-संज्ञक: ।
विभज्यानेन कर्त्तव्या मेखला कण्ठनाभय: ॥' इति
''व्यासे चतुर्विंशतिधा विभाजिते, तिस्रश्चतुस्त्रोऽथ भागविस्तृता: ।
समन्तत: कण्ठबहिस्तु मेखला, मनर्गुरामांशकत्वङ्गुला मता: ॥''
आचार्य्या: प्रोचु:—
'विंशद्भि चतुरधिकाभिरङ्गुलीभि:, मवगाप्यथ परिमृषाभूमिभागम् ।
ताभिश्च (परि) प्रखनतु तावतीभि.' इति ।
'कुण्डं जिनाङ्गुले स्तिर्य्यगूर्धं मेखलया सह ।' इति ।
२ (०) दिव्यसारसते,—
चतुरस्रं चतु: कोष्ठं सूत्रै: कृत्वा यथापुरा ।
हस्तमानेन तन्मध्ये तावन्निखातं खनेत् ॥
गणेशविमर्शिन्याम्,—
'चतुर्विंशाङ्गुलायामं तावत् खात समन्वितम्' इति ।
सोमशम्भूत्तरे,—हस्तमात्रं खनेत्तिर्य्यगूर्द्धं मेखलया सह । इति ।

एतेन यावत् परिमाणं कुण्डं विकाशितं तावत्परिमाणं तिर्य्यक् खननं कर्त्तव्यम्। अधः खननन्तु प्रथम-मेखलाग्रेण सह तावत्परिमाणं यथा भवति तथा कर्त्तव्य मित्युक्तं भवति। योन्यादिकुण्डेषु योयः आकारः परिकल्पित, स्तेनैवाकारेण स्व स्वप्रकृतिकृत-चतुरस्रविस्तारपरिमितं मानमधः प्रदेशात् प्रथम मेखलाग्रेण सहितं यथा भवति तथा यतेत।

## प्रतिष्ठासारसंग्रहेऽपि,—

पश्चात्रिमेखलोच्छ्रायं ज्ञात्वा शेषमधः खनेत्।

प्रपञ्चसारेऽपि—कुण्डं जिनाङ्गुलं तिर्य्य गूढ़ं मेखलया सहेति। अत्र जिनाङ्गुलं चतुर्व्विंशत्यङ्गुलम्। यत स्तीर्थ कराणां संख्याः चतुर्विंशतिः।

शारदातिलकेतु,—यावान् कुण्डस्यविस्तारः खननं तावदीरितम्, इत्येवोक्तम्। नतु मेखलासहेति। कुण्डकण्ठपरिमाणमुक्तं कालोत्तरे,—खाताद् बाह्येङ्गुलः कण्ठः सर्व्वकुण्डेष्वयं विधि रिति।

## पिङ्गलामते,—

खातादेकाङ्गुलन्त्यक्त्वा मेखलानां विधिर्भवेदिति।

विश्वकर्म्म शिल्पशास्त्रे,—

पश्चात् मेखलोच्छ्रायं ज्ञात्वाशेषमधः खनेत्।

व्यासात् खातः करः प्रोक्तः निम्नं तिथ्यङ्गुले नतु।

चतुर्विंशत्तु निम्नता ज्ञेया उन्नतावा नवाङ्गुलैः॥

अपरञ्च—'निम्नं तिथ्यङ्गुले नतु उन्नतावा नवाङ्गुलैः' इति।

मेखलाविषये, सोमशम्भुना—

कुण्डानां यश्चतुर्विंशो भागः सोऽङ्गुलसंज्ञकः।

विभज्यानेन कर्त्तव्या मेखला कण्ठनाभयः॥

'या यातु मेखला (प्रोक्ता) पूर्व्वा सा सा भूमिकदाहृता'। इत्येतदन्ते।

क्रियासारेच—

प्रधान मेखलोत्सेधं सुसमन्त नवाङ्गुलम्।

तदान्यमेखलोत्सेधं पञ्चाङ्गुलमितिस्मृतम्॥

अन्यत्रापि,—चतुस्त्रिद्व्यङ्गुला यद्वा तिस्रःसर्व्वत्र शोभनाः।

'वाशिष्ठेच,—प्रथमा मेखला तत्र द्वादशाङ्गुलविस्तृता।

चतुर्भिरङ्गुलैस्तस्याश्चोन्नतिश्च समन्ततः'॥

## सिद्धान्तशेखरेऽपि,—

कुण्डे हस्तमितं कण्ठं कुर्य्यादेकाङ्गुलन्ततः. इति। अत्र सर्व्वत्रैकहस्त परिमिते कुण्डे एकाङ्गुलपरिमित कण्ठाभिधानेनाधिक परिमाण कुण्डेषु त्यक्त्वा मेखलानां स्थितिर्भवेत्।

मेखलैकाऽथवा तिस्रो भूतसंख्यापिवा प्रिये।
एका षडङ्गुलोत्सेध विस्ताराद्विमेखला मतेति॥

## अत्र भूतसंख्या, पञ्चसंख्या।

## कालोत्तरे—

मेखलात्रितयं कार्य्यं कोण-राम-यमाङ्गुलैरिति। यदा मेखलात्रयं क्रियते तदेदं-परिमाणं क्रमोक्तेः। कोणाश्च, चत्वारः। रामा, त्रयः। यमौ द्वौ।

एवञ्च सति कण्ठसन्निहिता प्रथमा मेखला, भूप्रदेशान्नवाङ्गुलोच्चा चतुरङ्गुल-विस्तृतात द्वितीयातु, तद्बहिःपञ्चाङ्गुलोच्चा। त्र्यङ्गुलविस्तृता तृतीयापि, तद्बहिर्द्व्यङ्गु-लोच्चाद्व्यङ्गुलविस्तृतेति उक्तं भवति।

## इदञ्च स्पष्टीकृतम्, लक्षणसंग्रहे,—

प्रथमा द्व्यङ्गुलायामा (व्यासादुत्तरा) उन्नता सा नवाङ्गुलैः।
मध्यातु त्र्यङ्गुला बाह्ये तृतीयातु यमाङ्गुलै रिति।

## अत्र प्रथमा,—

कुण्डसन्निहिता। व्यासाद्विस्तार एतद्व्यङ्गुला उपरि चतुरङ्गुला. नवाङ्गुलोन्नतस्त्व-स्वन्तः प्रदेशे।

बाह्यप्रदेशेतु, द्वितीये मेखलाया उपरि चतुरङ्गुलोच्चैव मेखलापञ्चकपक्षे मत, परिमाणमपि तत्रैव,—

मेखलाः पञ्चवा कार्य्याः पट पञ्चाद्धित्रिपक्षकैः इति। अन्वयः—चत्वारः। पक्षौ द्वौ। सिद्धान्तशेखरेतु:—

मेखलापञ्च(क्ष)कपक्षे परिमाणान्तर मुक्तम् ।—

सर्व्वेषामेव कुण्डानां एका वा ( मेखला: )तिस्र एववा ।
पञ्चवा मेखलास्तासां उच्यते लक्षणं यथा ॥
चतुर्व्विंशेन भागेन कुण्डानामङ्गुलं मतम् ( स्मृतम् ) ।
कुण्डेच मेखलां कुर्य्यादेका वा ( चेत् )षड्भिरङ्गुलैः ।
चतुर्भिश्च त्रिभिर्द्वाभ्यां मूर्द्धामध्या त्वधोगता ।
तिस्रः प्रोक्ताः क्रमादेवं विस्तारा दुस्रयादपि ॥
वाणाब्दि वह्निभे चेन्दु मात्राः स्युः पञ्च मेखलाः ।
मेखलाः कीर्त्तिताः (सर्व्वाः) कुण्डानामनुरूपम् १(*) ।

योन्याद्याकारेषु कुण्डेषु योन्यथा(न्या)द्याकारा एव मेखलाः कार्य्या इत्यर्थः । विश्वकर्म्मणा वाप्येवमेवोक्तम् ,—

यादृक् कुण्डस्य विस्तार संप्रतिदिष्टः तादृग्रूपं मेखलाया विदध्यादिति । द्विहस्तादि कुण्ड विशेषस्य,—

सप्तपञ्च नवाङ्गुलैः । चतुर्हस्ते मेखलाः स्युरष्टत्तुच तुरङ्गलैः । मेखला- इति २(†) ।

१ (*) 'सत्त्वपौर्व्विक गुणान्विताः क्रमात् , द्वादशाष्ट चतुरङ्गुलोच्छ्रिताः ।
सर्व्वतोऽङ्गुलचतुष्कविस्तृताः, मेखलाः सकलसिद्धिदा मताः' ॥
नानामतेषु, मेखलाः एक-द्वि-त्रि-चतुः पञ्चविधा भवन्ति । शारदातिलकेतु,—कुण्डानां चतुरस्रादीनां यादृग्रूपं चतुरस्रत्वादि मेखलानामपि तादृशं रूपं ज्ञेयम् । एतेनच मेखलाः कुण्डाकाराः कार्य्याः स्युः । तिस्रः मध्यमः पञ्चोवोध्यः पञ्चमेखलापचम् उत्तमः ।
एक मेखलापक्षः कनीयान् इति ।
द्विमेखलापक्षस्तदातु मध्यमः ।
तथाच वायु संहितायाम्,—
'मेखलानां त्रयं वापि द्वयमेकमथापिवा' इति ।
'नाभि-योनिसमायुक्तं कुण्डं श्रेष्ठं त्रिमेखलम् ।
कुण्डं द्विमेखलं मध्यं नीचं स्यादेक मेखलम्' ।
'तिस्रः कुण्डे मेखलामेखले द्वे, यद्वाविप्रा नैकिका मेखला वा' इति ।
त्रिमेखलं द्विजकुण्डं क्षत्रियस्य द्विमेखलं वैश्यस्यैकामेखलाच' । इति सोमशम्भुः ।
२ (†) अत्र पाठव्यतिक्रमोऽस्ति । मेखलाः स्युः पञ्चहस्तानिधिद्विपशराङ्गुलैरिति भिन्नः पाठः ।

पञ्चहस्तनिधि द्विप शराङ्गुलैः ।
षट्करस्य च ताः प्रोक्ता उक्ताङ्गुलैश्च मेखलाः ॥

सप्तहस्तस्य रुद्राङ्क मेखला द्विपकाङ्गुलैः ।
अष्टहस्तस्य कुण्डस्य भानुवसुमिताङ्गुलैः ॥

नवहस्तमिते कुण्डे विश्वरुद्रनवाङ्गुलैः ।
दशहस्तमिते कुण्डे मनु—भानु दशाङ्गुलै रिति ॥

अत्र गुणास्त्रयः । ऋतवः षट् । निधयोनव । द्विपाः सप्त । शराः पञ्च । रुद्रा-एकादश । अङ्का-नव । भानवोद्वादश । वसवोऽष्टौ । विश्वे त्रयोदश । मनवश्चतुर्द्दश ।

## योनि लक्षण मुक्तं स्वायम्भुवे,—१(*)।

मेखलामध्यतोयोनिः कुण्डार्द्धा त्र्यंशविस्तृता ।
अङ्गुष्ठमानतो(ष्ठ)त्तकण्ठा कार्य्याश्वत्थदलाकृतिरिति ॥
मेखला मध्य देशश्चोपरितनोग्राह्यः ।

योनिः स्यान्मेखलोपमेति सिद्धान्तशेखरेऽभि धानान । कुण्डार्द्धामिति, यावत परिमाणं यत कुण्डं तदर्द्धं परिमाणेन दोर्घांशविस्तृता सा कुण्डतृतीयां शेन विस्तृता ।

अङ्गुष्ठमानोऽष्टकण्ठा । अत्राङ्गुष्ठशब्द कुण्ड चतुर्विंशां शरूपाङ्गुलपरः ।

ओष्ठशब्देनात्र कुण्डमध्य प्रविष्टं योन्यग्र मुच्यते । तथाङ्गुल परिमितं कार्य्यमित्यर्थः । कण्ठशब्देनात्र—योनिमेखलोच्यते । तथाङ्गुलपरिमितायामेखलायाः प्रान्तभागे परितोवेष्टिता योनिः कार्य्येत्यर्थः ।

दैर्घ्यात्तुर्य्याङ्गुलो ( तृसूर्य्याङ्गुलो ) योनिस्त्र्यं शोना विस्तारेणतु ।

१ (*) कुण्डानां यश्चतुर्विंशोभागः सोऽङ्गुलसंज्ञकः ।
विभज्यानेन कर्त्तव्यामेखला कण्ठनाभय' इति स्वायम्भुवे ।
'चतुर्विंशतिभागेन कण्ठोवै परिकीर्त्तितः' इति पञ्चरात्रे ।
अन्यत्र 'कण्ठाङ्गुलावधिः कार्य्या मेखलैका षडङ्गुला' इत्यन्यत्र ।
सिद्धान्तशेखरे,—'कुण्डानां मेखलां कुर्य्यादेकाद्येनषडङ्गुलैः ।

एकाङ्गुलोच्छ्रिता सातु प्रविष्टाभ्यन्तरे तथा ।
कुम्भद्वयसमा युक्ता चाश्वत्थदलवन्मता ॥
अङ्गुष्ठ मेखला युक्ता मध्ये त्वाज्याधृतिस्तथा १(*) ।

## त्र्यंशोनेति—

प्रथमभागे तृतीयोंशन्यूनस्वदैर्घ्यविस्तारेत्यर्थः ।
एकाङ्गुलोच्छ्रितेदि,—एकेनाङ्गुलेनोन्नता ।
एतेन योनिपरिमाणेन सह मेखलाद्वयङ्गुलोन्नता भवति ।
तथा एकाङ्गुलेन योन्यग्रेणाभ्यन्तरे कुण्डमध्ये सा प्रविष्टा कार्य्या ।

## कुम्भद्वयसमायुक्तेति—

मूलदेशे वृत्तार्द्धद्वयाकारत्वेन गजकुम्भाकृतित्वात् कुम्भ शब्दोक्ता ।

## मध्येत्विति—

यथा सूची मूले सूत्र धारणाय विलं युक्तम् ।
तथा योनिरपि मध्ये सविला कार्येत्यर्थः ।
इयञ्चाश्वत्थपत्र सदृशी गजौष्ठसदृशी वा कार्य्या ।
अश्वत्थ—पत्रवद् योनिर्गजौष्ठ प्रतिमा थवेति,—
सिद्धान्तशेखराभिधानात् ।

## पूर्व्वादि कुम्भस्य दिग्भागेन योनिः स्यात् ।

## तत् पुनरुक्तं स्वायम्भुवं—

प्रागग्नि याम्यकुण्डानां प्रोक्ता योनिरु दङ्मुखा ।
पूर्व्वा मुखाः स्मृताः शेषाः यथाशोभं व्यवस्थिता २(†) ।
अत्र प्रागग्नि याम्यकुण्डानां पूर्व्वाग्नेय दक्षिणकुण्डानामिति ।
उदङ्मुखोदगग्रा दक्षिणमेखलोपरि निहितेत्यर्थः ॥
पूर्व्वामुख पूर्व्वाग्राः पश्चिम मेखलोपरि विनिहिता इत्यर्थः ।
शेषास्तु नैर्ऋत्यादि कुण्डयोनयः ।
नवकुण्डी पक्षेतु , नवमकुण्डस्य योनि रुदगग्रा कर्त्तव्या ।

---

१ (*) अत्र पाठभ्रान्ति र्जातोऽस्ति ।

२ (†) त्रैलोक्यसारेच—'दक्षिणस्या पूर्व्वयाम्ये जलस्या चक्षोत्तरे' इति पाठान्तरं दृश्यते ।
( अत्र पूर्व्व शब्दे नाग्नेयी, जलस्येति नैर्ऋते, चाक्षुषे उत्तरे इति बोध्यते ) ।

## त्रैलोक्यसारे च—

दक्षिणस्थाः पूर्व्वयाम्ये जलस्थाः पश्चिमोत्तरे ।
नवमस्यापि कुण्डस्य योनिर्दक्षजलस्थिता १(*) ॥

अत्र नवम कुण्डपक्षे, ईशानदिशि यत् पञ्चम
माचार्य्यकुण्डं तस्यापि योनिरुदगग्रा कार्य्येत्यर्थः ।

## केचित्तु,—

योनिकुण्डे योनिमब्जकुण्डेनाभिञ्च वर्जयेदिति
शारदातिलकवचनात् ।

योनौ योनिं न कुर्वीत इति सिद्धान्त शेखर वचनाच्च ।
योनिं न कुर्य्यादित्याहुः ।

खातादति रिक्तस्या समस्य तद्विहीनस्यवा कुण्डस्य
करणे दोषउक्तो-विश्वकर्म्मणा,—

खातेऽधिके भवे द्रोगी हीने धेनु धनक्षयः ।
वक्रे कुण्डेतु सन्तापो मरणं छिन्न(न्न)मेखले ।
मेखलारहिते शोकोऽप्यधिके वित्तसंक्षयः ॥
भार्य्याविनाशनं प्रोक्तं कुण्डे योन्या विना कृते ।
अपराद्धें समं प्रोक्तं कुण्डं वै कण्ठवर्जितम् । इति ।

---

१ (*) 'इन्द्राग्नि यम दिक्कुण्डयोनिः सौम्यमुखी मता ।'
" क्रियासारेऽपि 'होमकृत् पुरतः ख्याप्या दक्षिणे पश्चिमेऽपि च।' । ख्याप्या—योनिरित्यर्थः ।
" सोम शम्भुरपि च 'पूर्व्वाग्नि याम्य कुण्डानां योनिः स्यादुत्तरानना ।
पूर्व्वाननातु शैवाख्ये ऽप्यानेऽन्यतरा तयोः' ॥
पञ्चशाखे,—
'इति एकदेशीन नवम कुण्ड' ग्राह्यम् । पञ्चैव पूर्व्वाग्नेय दक्षिण कुण्डानि, नवमञ्च
कुण्डमुत्तराख्यम् । अन्यानि पञ्च कुण्डानि च प्रागग्राण्येव चिति' ॥

## अत्र सिद्धान्त शेखरेऽपि,—१(*) ।

मानहीने महाव्याधि रधिके शत्रुवर्द्धनम् ।
योनिहीनेऽपस्मारो कुष्ठः कुण्ठं विवर्जिते २(†) ।
स्थण्डिलं चापि कुर्वीत सुसिद्धैः सिकतैः सितैः ॥
हस्तमात्रं प्रविस्तारं सुसन्मन्त्र्यां गुलोन्नतम् ॥ इति ।

इति श्रीमन्नागदेव भट्टात्मजेनानन्तदेवाचार्य्येण
विरचिते ( चतुर्थस्तबके ) दानविधान
पारिजाते परिभाषा प्रकरणम् ।
समाप्तिमगमच्चतुर्थः स्तबकः ॥

—*—

१ (*) कुण्डमण्डपादिविषये, वैदिके, कल्पशास्त्रे, मन्त्रशास्त्रे, ज्योतिषे, पुराणे, शिल्पशास्त्रादिषु यद् यदुक्तं तत्तन्नियमेन सर्व्वं विधेयम् । अन्यथा करणे महदेव हानं विफलञ्च स्यात् ।

२ (†) अशुभ माह,—मानाधिके भवेन्मृत्यु रित्यागमे । मानहीने दरिद्रता' इति ।
न्यूनाधिक प्रमाणं यद् यजमान विनाशकृत्' इति च ।
विश्वकर्म शिल्पशास्त्रे—अपत्यध्वं सनं प्रोक्तं कुण्डं यत्कण्ठवर्ज्जितम्' इत्थं पाठान्तरमपि । न्यूनाधिक प्रमाणं यत् कुण्डं यच्चाऽरमेखलम् ।
श्रृङ्गाररहितं यच्च यजमान विनाशकृत् ॥ इति क्रियासारे ।
'अनेकदोषदं कुण्डमत्र न्यूनाधिकं यदि ।
तस्मात् सम्यक् परीक्ष्येदं कर्त्तव्यं शुभमिच्छता' ॥ इति वसिष्ट संहितायाम् ।
" 'नूनाधिके सुहृदुःखो मानहीनेतु निःस्वता ।
बाधोधः कण्ठहीनेस्यात् अक्षिहिर्न्यून खातके ॥
अधिकेचा सुखोभोगी मानेनाधिक मेखले ।
व्याधयः सम्प्रवर्द्धन्ते विभागेस्यादप भूतिः ॥
उच्चाटः स्फटितेच्छिद्रे सङ्कुले बाध्यता भवेत्' ॥ इति जयद्रथयामले ।
" कुण्डं विना स्थण्डिलादिषुच होमोविधिः:—
'होमे प्रशस्यते कुण्डं स्थण्डिलं वा हस्तन्निका' इति पिङ्गलामते ।
'इषु मात्रं स्थण्डिलं वा संविप्रं होमकर्मणि' । इति वासिष्ठ संहितायाम् ।
अथापि कार्य्यं वक्ष्यामि कुण्डे वा स्थण्डिलेऽपिवा ।
वेद्यां वाऽथायसे पात्रे मृन्मयेवा नवे शुभे' । इति वायवीयसंहितायाम् ।
स्थण्डिलं वालुकाभिश्च रक्त मृद्गजवापिवा' इति क्रियासारे ।

—*—

| | ग्रन्थोक्तविषयः, | उद्धृतग्रन्थनाम, | पृष्ठाङ्कः, |
|---|---|---|---|
| ५६ । | धान्यानि, पर्व्वतदानम् , | पाद्मं मात्स्यञ्च, | १२९ |
| ५७ । | शैलदानदशकम् , | दान विवेकः, | १३५ |
| | ” | मात्स्यं पाद्मञ्च, | १३७ |
| ५८ । | लवणाचलदानम् , | पाद्मम् , | १३८ |
| ५९ । | गुड़ाचलदानम् , | ” | १३९ |
| ६० । | सुवर्णाचल ” , | ” | १४० |
| ६१ । | तिलाचलदानम् , | ” | १४१ |
| ६२ । | कार्पासाचल ” , | ” | १४२ |
| ६३ । | घृताचलदानम् , | ” | १४३ |
| ६४ । | रत्नाचल ” , | ” | १४५ |
| ६५ । | रौप्याचल ” , | ” | १४६ |
| ६६ । | शर्कराचल ” . | ” | १४८ |
| ६७ । | शिखरदानम् , | विष्णुधर्म्मोत्तरम् , | १५० |
| ८ । | शिखरदान प्रयोगः, | ” | १५१ |
| ६९ । | अन्यमहादानानि , | कौर्म्मम् , | १५२ |
| ७० । | ” | स्कान्दम् , | १५४ |
| | आनन्दनिधि दानविधानम् | वह्निपुराणम् , | १५६ |
| ७१ । | भद्रनिधिदान ” ” | वह्निपुराणम् , | १६१ |
| ७२ । | शतमान दानविधिः, | ब्रह्माण्ड पुराणम् . | १६३ |
| ७३ । | हेमदान विधानम् , | वायु पुराणम् . | १६४ |
| ७४ । | प्रसङ्गाद्रजत दानविधानम् , | नन्दि पुराणम् , | ” |
| | ” ” | स्कान्द पुराणम् , | १६५ |
| | ” ” | मात्स्यम् . | १६५ |
| ७५ । | अश्वदानम् | स्कान्दम् . | ” |
| | ” ” | ” | १६६ |
| | ” ” | महाभारतम् . | १६८ |
| ७६ । | तिलदानम् , | मात्स्यम् . | ” |
| | ” | ” | ” |
| | ” | कौर्म्मम् . | ” |
| | ” | विष्णुधर्म्मोत्तरम् , | ” |

| | ग्रन्थोक्तविषयः, | उद्धृतग्रन्थनाम, | पृष्ठाङ्कः, |
|---|---|---|---|
| ७७ । | तिल मृगदानम् , | हेमाद्रि , | १६९ |
| | ,, | कौर्म्मम् , स्कान्दम् , | १७० |
| ७८ । | ऋणापाकरणार्थं कांस्य पात्र दानम् , | आदित्य पुराणम् , | १७१ |
| ७९ । | तिलराशि दानम् , | पाद्मम् , | १७४ |
| | ,, ,, | नारदीयम् , | १७६ |
| ८० । | तिल पद्म दानम् , | महाभारतम् , | १७८ |
| | ,, | हेमाद्रि, | १७९ |
| | ,, | | |
| ८१ । | रुद्रैकादश तिलदानम् , | | १८१ |
| ८२ । | तिल गर्भ दानम् , | ब्रह्माण्ड पुराणम् , | १८१ |
| | ,, | देवी पुराणम् , | १८३ |
| ८३ । | त्रिपद्मदानम् , | पुराणम् , | १८५ |
| ८४ । | तिल पीठदानम् , | वायु पुराणम् , | १८६ |
| ८५ । | तिलादर्शदानम् , | वायुपराणम् , | १८७ |
| ८६ । | देवताभ्योगजदानम् , | शैव धर्म्मः , | १८८ |
| ८७ । | विष्णुगज दानम् , | गरुडपुराणम् , | १८९ |
| ८८ । | सूर्य्यगजदानम् , | आदित्य पुराणम् , | १९० |
| ८९ । | दासी दानम् , | कौर्म्मम् , | ,, |
| | ,, | वह्निपुराणम् , | ,, |
| ९० । | रथदानम् , | गारुडम् , | १९२ |
| | ,, ,, | कौर्म्मम् , | ,, |
| | ,, ,, | स्कान्दम् , | १९३ |
| ९१ । | शिविकादानम् , | वह्निपुराणम् , | ,, |
| ९२ । | भूमिदानम् , | कूर्म्मपुराणम् , | १९४ |
| | ,, ,, | मात्स्यम् , | १९५ |
| | ,, ,, | ,, | १९६ |
| | ,, ,, | महाभारतम् , | ,, |
| ९३ । | गृह दानम् | कौर्म्मम् , | १९७ |
| | ,, ,, | गारुडम् , | ,, |
| | ,, ,, | मात्स्यम् , | १९८ |

| | ग्रन्थोक्त विषयः, | उद्धृत ग्रन्थनाम, | पृष्ठाङ्कः, |
|---|---|---|---|
| १०२। | गोदानम्, | महाभारतम्, | २२७ |
| १०३। | मत्स्य पुराणोक्तगोदानम्, | नन्दिपुराणम्, | २३० |
| १०४। | समान वत्सा दानम्, | भारतम्, | २३१ |
| १०५। | वृशवर्ण धेनुदानम्. | महाभारतम्, | २३२ |
| | " | विष्णुधर्म्मोत्तरम्, | २३३ |
| १०६। | देवताभ्यो गोदानम्, | | " |
| | " | वह्निपुराणम्, | २३४ |
| १०७। | वृषमेकादश गोदानम्, | स्कान्दम्, | २३५ |
| | " | भविष्यम्, | २३६ |
| १०८। | वृषभाधिक गोशत दानम्, | शिव धर्म्म, | " |
| | " | भविष्य पुराणम्, | " |
| १०९। | स्वरूप गोदानम्, ,, | " | २३७ |
| ११०। | गो प्रार्थना | | २४० |
| १११। | उभयतोमुखी गोदानम्, | मात्स्यम्, | २४२ |
| | " | वाराहम्, | " |
| | " | मात्स्यम्, | २४३ |
| | " | ऋग्-शुक्ल-यजुः मन्त्राः, | २४५ |
| | " | ऋग्-अथर्व्ववेद-मन्त्राः, | २४६ |
| ११२। | वैतरणी धेनुदानम्, | ब्रह्मवैवर्त्तम्, | २४८ |
| | " | " | २५० |
| ११३। | प्रसङ्गाद् वृषभदानम्, | भविष्योत्तरम्, | २५१ |
| | " | महाभारतम्, | २५२ |
| ११४। | हेमरौप्य वृषभदानम्, | वह्निपुराणम्, | २५३ |
| ११५। | गुडादिधेनुदानम्, | मात्स्यम्, | २५६ |
| | " | " | २५१ |
| ११६। | गुडधेन्वादि दशक-प्रयोगः, | | २५[illegible] |
| ११७। | तिल धेनु प्रकरणम्, | विष्णु धर्म्मोत्तरम्, | २६[illegible] |
| | " | वाराहम्, | " |
| | " | महाभारतम्, | २६[illegible] |

| | ग्रन्थोक्तविषयः, | उद्धृतग्रन्थनाम, | पृष्ठाङ्कः, |
|---|---|---|---|
| ११८। | सप्तव्रीहि धेनुदानम्, | | २६२ |
| ११९। | घृतधेनु दानम्, | स्कान्दम्, | २६३ |
| | " | " | २६५ |
| | " | " | २६५ |
| १२०। | एवमेव घृतधेनुरुक्ता, | | " |
| १२१। | नवनीत धेनुदानम्, | भविष्ये, | २६६ |
| १२२। | जलधेनुदानम्, | | २६७ |
| | " | विष्णुधर्म्मोत्तरम्, | " |
| | " | देवीपुराणम्, | २६९ |
| | " | स्कान्दम्, | २७० |
| १२३। | क्षीरधेनुदानम्, | | २७१ |
| १२४। | दधिधेनुदानम्, | | २७३ |
| १२५। | मधुधेनुदानम्, | स्कान्दम्, | २७५ |
| १२६। | इक्षुरस धेनुदानम्, | " | २७७ |
| १२७। | शर्कराधेनुदानम्, | " | २७८ |
| १२८। | कार्पास धेनुदानम्, | वाराहम्, | २८० |
| १२९। | लवणधेनुदानम्, | " | २८१ |
| १३०। | कर्पूरादि धेनुदानम्, | भविष्यम्, | २८२ |
| १३१। | सुवर्ण धेनुदानम्, | विष्णुधर्म्मोत्तरम्, | २८४ |
| | " | " | २८५ |
| १३२। | प्रमेहघ्न सुवर्ण धेनुदानम्, | वह्निपुराणम्, | २८६ |
| १३३। | वन्ध्यात्वहर सुवर्णधेनुदानम्, | वायुपुराणम्, | २८७ |
| १३४। | प्रस्विन्न पाणिपादत्वहर सुवर्णधेनुदानम्, | | २८८ |
| १३५। | अथासां दानम्, | गारुडम्, | २९१ |
| १३६। | विद्याप्रतिमादानम्, | | २९१ |
| | " | | २९६ |
| १३७। | वेदविद्या प्रतिमादानम्, | | २९७ |
| १३८। | स्मृतिदानम्, | नन्दिपुराणम्, | २९९ |
| | " | भविष्यम्, | ३०१ |
| | " | वाराहम्, | " |
| | " | वह्निपुराणम् | ३०२ |

| | ग्रन्थोक्तविषयः, | उद्धृत ग्रन्थनाम, | पृष्ठाङ्कः, |
|---|---|---|---|
| १३९। | पुराणदानम्, | सौरपुराणम्, | ३०३ |
| | ” | मात्स्यम्, | ३०४ |
| १४०। | उपपुराणदानम्, | वामनपुराणम्, | ३०९ |
| | ” | मात्स्यम्, | ” |
| १४१। | वेददानम्, | | ३११ |
| १४२। | सामान्यतः सर्व्वविध दानम्, | मदनरत्नम्, | ३१२ |
| १४३। | शिवशास्त्रादि विधानम्, | नन्दिपुराणम्, | ” |
| | ” | देवीपुराणम्, | ३१४ |
| १४४। | त्रिपुरुषदानम्, | मृत्युञ्जयः, | ३१५ |
| १४५। | नवग्रह दानम्, | | ३१६ |
| १४६। | दशावतार दानम्, | | ३१९ |
| १४७। | लक्ष्मीनारायण दानम्, | चतुर्व्वर्गचिन्तामणिः | ३२२ |
| १४८। | घण्टादानम्, | ब्रह्मवैवर्त्तम्, | ३२३ |
| | ” | वाजसनेयम्, | ३२४ |
| १४९। | सरस्वतीदानम्, | वायुपुराणम्, | ३२५ |
| १५०। | कुवेर मूर्त्ति दानम्, | ” | ३२६ |
| | ” | श्रीप्रश्नम्, | ३२७ |
| १५१। | आत्मप्रतिकृतिदानम्, | भविष्योत्तरम्, | ३२८ |
| १५२। | चतुर्म्मूर्त्तिदानम्, | हेमाद्रिः, | ३३० |
| | ” | ब्रह्माण्डम्, | , |
| १५३। | पञ्चमूर्त्ति दानम्, | ” पुराणम्, | ३३ |
| १५४। | द्वादशादित्य दानम्, | ” | ३३ |
| १५५। | चन्द्रादित्य दानम्, | विष्णुधर्म्मोत्तरम्, | ३३ |
| १५६। | कालपुरुष दानम्, | भविष्योत्तरम्, | ३३ |
| १५७। | कालचक्र दानम्, | मृत्युञ्जयः | ३३ |
| १५८। | यम दानम्, | हेमाद्रिः | ३४ |
| १५९। | पापपुरुष दानम्, | स्कान्दम्, | ३४ |
| | ” | नागरखण्डे, | , |
| १६०। | उदकुम्भ दानग्, | शौनकीयम्, | [illegible] |
| १६१। | मकरदानम्, | हेमाद्रिः, | ३ |

| | ग्रन्थोक्तविषयः, | उद्धृतग्रन्थनाम, | पृष्ठाङ्कः |
|---|---|---|---|
| १६२। | लोकपालाष्टक दानम्, | ब्रह्माण्डपुराणम्, | ३४६ |
| १६३। | अजादि दानम्, | महाभारतम्, | ३४७ |
| १६४। | मेषी दानम्, | भविष्योत्तरम्, | ३४८ |
| १६५। | अजादानम्, | विष्णुधर्म्मोत्तरम्, | ३५० |
| १६६। | मेषदानम्, | हेमाद्रिः | ३५२ |
| १६७। | महिषी दानम्, | भविष्योत्तरम्, | ३५३ |
| १६८। | कृष्णाजिन दानम्, | मात्स्यम्, | ३५५ |
| | ” | गारुड़म्, | ३५९ |
| | ” | मत्स्यपुराणम्, | ” |
| | ” | कालिकापुराणम्, | ” |
| | ” | आदित्यपुराणम्, | ” |
| १६९। | गृष्टिकृष्णाजिनदानम्, | | ३६० |
| १७०। | आर्द्र कृष्णाजिनदानम्, | विष्णुधर्म्मोत्तरम्, | ३६१ |
| | ” | ” | ३६१ |
| | ” | वह्निपुराणम्, | ३६४ |
| | ” | भविष्यपुराणम्, | ” |
| | ” | वाराहम्, | ” |
| १७१। | तिथिप्रयुक्तदानम्, | विष्णुधर्म्मोत्तरम्, | ३६५ |
| | ” | भविष्यम्, | ३६६ |
| १७२। | वारप्रयुक्त दानम्, | विष्णुधर्म्मोत्तरम्, | ” |
| | ” | ब्रह्मपुराणम्, | ३६८ |
| १७३। | नक्षत्रप्रयुक्त दानम्, | स्कान्दम्, | ” |
| १७४। | योगादि-दानम्, | विष्णुधर्म्मोत्तरम्, | ” |
| १७५। | करण दानम्, | ” | ३६९ |
| १७६। | संक्रान्ति दानम्, | वामनम्, | ३७० |
| १७७। | मास दानम्, | | ” |
| | ” | देवीपुराणम्, | ३७१ |
| | ” | | ३७२ |
| १८७। | ऋतु दानम्, | विष्णुधर्म्मोत्तरम्, | ३७३ |

| ग्रन्थोक्त विषयः, | उद्धृत ग्रन्थनाम, | पृष्ठाङ्कः, |
|---|---|---|
| १७९। अयन दानम्, | स्कान्दम्, | ३७४ |
| " | विष्णुधर्म्मोत्तरम्, | ३७४ |
| १८०। सम्वत्सर दानम्, | " | " |
| १८१। आरोग्य दानम्, | नन्दिपुराणम्, | ३७५ |
| " | सौर पुराणम्, | ३७६ |
| १८२। रत्नदानम्, | मदनरत्नम्, | ३७६ |
| " | स्कान्दम्, | " |
| १८३। श्रीमुक्ताफल दानम्, | | ३७७ |
| १८४। आरोग्याद्यर्थं मुक्ताफल दानम्, | | ३७८ |
| १८५। अलङ्कार दानम्, | ब्रह्मवैवर्त्त पुराणम्, | ३८० |
| १८६। वस्त्र दानम्, | नन्दि पुराणम्, | " |
| " | विष्णु धर्म्मोत्तरम्, | ३८१ |
| " | भविष्य पुराणम्, | " |
| " | आदित्य पुराणम्, | " |
| " | नन्दि पुराणम्, | " |
| " | वाराहम्, | ३८२ |
| " | देवी पुराणम्, | " |
| " | नन्दि पुराणम्, | " |
| " | नारदीयम्, | " |
| १८७। शय्या दानम्, | विष्णु संहिता, | ३८३ |
| " | महाभारतम्, | ३८४ |
| " | स्कान्दम्, | " |
| १८८। देवशय्या दानम्, | विष्णु संहिता, | ३८५ |
| १८९। आसन दानम्, | शिवधर्म्मम्, | ३८६ |
| " | लिङ्ग पुराणम्, | ३८६ |
| " | स्कान्दम्, | " |
| १९०। दर्पण दानम्, | आदित्य पुराणम्, | ३८७ |
| १९१। व्यजन दानम्, | मार्कण्डेय पुराणम्, | " |
| " | भविष्य पुराणम्, | ३८८ |

| ग्रन्थोक्तविषयः, | उद्धृतग्रन्थनाम, | पृष्ठाङ्कः, |
| --- | --- | --- |
| २०५। अश्वत्थ सेवनम्, | भविष्योत्तरम्, | ४०२ |
| २०६। तरुपुत्रकविधिः, | " | ४०३ |
| " | नन्दि पुराणम्, | " |
| " | पद्मपुराणम्, | ४०४ |
| २०७। अश्वत्थोपनयनम्, | स्कान्दम्, | ४०५ |
| २०८। गलन्तिका दानम्, | शौनकीयम्, | ४०९ |
| २०९। मणिक-दानम्, | भविष्यम्, | ४१० |
| २१०। अन्यद्रुमणिक दानम्, | भविष्योत्तरम्, | ४१२ |
| २११। प्रपादानम्, | गारुड़म्, | " |
| २१२। पान्थोपचारः, | विष्णुधर्म्मोत्तरम्, | ४१३ |
| " | स्कान्दम्, | ४१४ |
| " | नन्दिपुराणम्, | " |
| " | भविष्य पुराणम्, | ४१५ |
| " | आदित्य पुराणम, | " |
| २१३। गो परिचर्य्या, | महाभारतम्, | " |
| " | ब्रह्म पुराणम्, | " |
| " | विष्णुधर्म्मोत्तरम्, | ४१६ |
| " | नन्दि पुराणम्, | " |
| २१४। यज्ञोपवीत दानम्, | स्कान्दम्, | ४१७ |
| २१५। यष्टि दानम्, | " | " |
| ११६। इन्धन दानम्, | वह्नि पुराणम्, | ४१८ |
| " | महाभारतम्, | " |
| २१७। अग्निष्टिका दानम्, | भविष्योत्तरम्, | ४१९ |
| २१८। दीपदानम्, | गारुड़म्, | ४२० |
| " | भारतम्, | " |
| " | विष्णुधर्म्मोत्तरम्, | ४२१ |
| २१९। अभय दानम्, | रामायणम्, | ४२ |
| " | महाभारतम्, | |
| " | वह्नि पुराणम्, | |
| " | विष्णुधर्म्मोत्तरम्, | ४२ |

चतुर्थस्तबकस्य-विषयसूची ।


| | ग्रन्थोक्तविषयः, | उद्धृतग्रन्थनाम, | पृष्ठाङ्काः, |
|---|---|---|---|
| २२० । | पात्र दानम्, | पाद्मम्, | ४२५ |
| | " | मात्स्यम् | ४२६ |
| २२१ । | कल्प दानम्, | देवी पुराणम्, | ४२७ |
| २२२ । | नाना दानम्, | विष्णु पुराणम्, | ४२८ |
| | " | नारसिंह पुराणम्, | ४२९ |
| २२३ । | यत्यादि वपन दानम्, | विष्णुधर्म्मोत्तरम्, | ४३० |
| २२४ । | अश्वत्थ विवाह विधानम्, | | ४३० |
| २२५ । | शालग्राम दानविधानम्, | पद्मपुराणम्, | ४३१ |
| २२६ । | शालग्राम-शिलामूर्ति लक्षणम्, | गारुड़म्, | ४३३ |
| | " | नारदीयम्, | ४३५ |
| २२७ । | तद्दान विधिस्तु ( कूर्म्मपुराणे ) | | ४३७ |
| २२८ । | विष्णुप्रतिमा दानम्. | कूर्म्मपुराणम्, | ४३९ |
| २२९ । | शिवलिङ्ग दानम्, | शिवधर्म्मम्, | ४४०—४४२ । |


इति विधान-पारिजाते चतुर्थस्तवकस्य
संक्षिप्त विषयसूची समाप्ता ॥

—*—

# अथ परिभाषोक्तविषयसूची ।


| | ग्रन्थोक्तविषयः, | उद्धृतग्रन्थनाम, | पृष्ठाङ्काः, |
|---|---|---|---|
| १ । | परिभाषा निरूपणम्, | व्यासोक्तम्, | ४४३ |
| २ । | दान धर्म्मः, | " | " |
| ३ । | शूद्रविषयः, | जातूकर्णः, | " |
| ४ । | त्रैवर्णिकाधिकारः, | याज्ञवल्क्यः, | ४४४ |
| ५ । | आर्य्यादि लक्षणम्, | " | " |
| | ( इति संक्षिप्त परिभाषा ) | | |
| ६ । | प्रतिमादि द्रव्यपरिमाणम्, | भविष्यम्, | ४४५ |
| ७ । | अन्न विशेषः, | पुराणान्तरम्, | " |

| ग्रन्थोक्तविषयः, | उद्धृतग्रन्थनाम, | पृष्ठाङ्कः, |
|---|---|---|
| ३१ । कृत्याधिकारी | वशिष्ठः, | ४५३ |
| " | याज्ञवल्क्यः, | " |
| " | कात्यायनः, | ४५४ |
| " | बौधायनः, | " |
| " | मनुरपि, | " |
| " | स्कान्दे, | " |
| " | कात्यायनः, | " |
| " | वायुपुराणम्, | " |
| " | विष्णुधर्म्मोत्तरम्, | ४५५ |
| " | कात्यायनः, | " |
| " | भट्टपादः, | " |
| " | पैठीनसिः, | ४५६ |
| " | बौधायनः, | " |
| ३२ । प्रतिनिधिः, | ब्रह्मवैवर्त्त, | " |
| " | भविष्यपुराणम्, | " |
| " | गृह्यपरिशिष्टः, | ४५७ |
| ३३ । अथ दक्षिणानिरूपणम्, | व्यासः, | " |
| " | भविष्योत्तरम्, | ४५८ |
| " | स्कान्दे, | ४५८ |
| " | भविष्योत्तरभागे, | " |
| ३४ । दक्षिणामानानुक्ते, | गारुड़म्, | ४५६ |
| " | व्यासः, | " |
| " | मात्स्ये, | ४६० |
| " | मनुः, | " |
| ३५ । अथ द्रव्यमाणम्, | विष्णुगुप्तः (कौटिल्यः) | ४६१ |
| ३६ । (सुवर्णपरिमाणम्), | वृहत्पाराशरम्, | " |
| " | याज्ञवल्क्यः, | " |
| " | विष्णुः, | " |
| " | ब्रह्म-प्रोक्तः, | " |
| " | मतान्तरम्, | " |
| " | | |

| ग्रन्थोक्तविषय, | उद्धृतग्रन्थनाम, | पृष्ठाङ्कः, |
|---|---|---|
| अथ मण्डपादि निरूपणम्, | ढुंढुकारिकायाम्, | ४७३ |
| | मूलागमः, | " |
| " | पिङ्गलागमः, | ४७५ |
| " | मूलागमः, | ४७७ |
| " | मात्स्यम्, | ४८१ |
| " | स्मृतिः, | ४८२ |
| " | गारुड़म्, | ४८३ |
| " | मात्स्यम्, | ४८३ |
| " | मूलागमः, | " |
| " | भविष्योत्तरम्, | ४८४ |
| ४५। अथ कुण्डानि, | आम्नाय रहस्यम्, | " |
| " | ज्ञान रत्नावली, | " |
| " | नारदीय मात्स्ययोः, | " |
| " | प्रतिष्ठा दीपकम्, | ४८५ |
| " | कामिकम्, | " |
| " | शारदातिलकम्, | " |
| " | सिद्धान्त शेखरम्, | ४८६ |
| " | शारदा तिलकम्, | " |
| " | स्कान्दम्, | ४८७ |
| " | शारदा तिलकम्, | " |
| " | सिद्धान्त शेखरम्; | ४८८ |
| ४६। योनिकुण्डम्, | शारदायाम्, | " |
| ४७। अर्द्धचन्द्र कुण्डम्, | सिद्धान्त शेखरम्, | ४८९ |
| " | शारदा तिलकम्, | " |
| " | कामिकागमः, | " |
| " | | |
| ४८। त्रिकोण कुण्डनिर्म्माणम्, | शारदातिलकम्, | ४९० |
| | कामिकः, | " |
| " | | |
| ४९। वृत्तकुण्डनिर्म्माणम्, | शारदा तिलकम्, | ४९१ |
| | कामिकागमम्, | " |
| " | | |

